| Serial Number ↓ | Roll No. | | SET / सेट **B** |
|---|---|---|---|

**202531**

हायर सेकेण्डरी मुख्य परीक्षा वर्ष - 2025

**Higher Secondary Examination (Main) - 2025**

# संस्कृत

# SANSKRIT

Total Printed Pages : 8

Total Questions : 23

Time : 3 Hours

Maximum Marks : 80

निर्देशा :

(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

(iii) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि।

1 उचितमेलनं कुरूत – 1×7=7

| क | | ख | |
|---|---|---|---|
| (1) | रसालः | (अ) | विद्या |
| (2) | कुपितः | (ब) | पुरुषः |
| (3) | कीर्तिः | (स) | चत्वारः |
| (4) | अल्पज्ञः | (द) | सहकारः |
| (5) | का विनयं ददाति | (य) | अपकीर्तिः |
| (6) | वेदाः कति सन्तिः | (र) | अव्ययः |
| (7) | तत्र | (ल) | शान्तः |

2 एकपदेन उत्तरं लिखत – **1×7=7**

(क) पंचमी विभक्तेः कः **कारकः** अस्ति?

(ख) 'ज्ञात्वा' इत्यस्मिन् पदे कः **धातुः** अस्ति?

(ग) प्रतापी तनयः इत्यस्मिन् **पदे विशेषणं** किम् अस्ति?

(घ) 'भू' पदस्य पर्यायपदं किम्?

(ङ) 'शूरम् पुरुषम्' इत्यस्मिन् पदे विशेष्यं पदं किम् अस्ति?

(च) 'कपटी संन्यासिन्' इत्यस्मिन् पदे विशेषण पदं लिखत।

(छ) सत्यात् किं न कर्त्तव्यम्?

3 **शुद्धवाक्यानां समक्षे 'आम्' अशुद्धवाक्यानां समक्षे 'न' इति लिखत –** **1×6=6**

(क) 'कुमारी' इत्यस्मिन् पदे ङीप् प्रत्ययः अस्ति।

(ख) टाप् प्रत्ययः स्त्रीलिंगे भवति।

(ग) 'पुरा दशरथः नाम राजा आसीत' इत्यस्मिन् पदे पुरा अव्यय पदम् अस्ति।

(घ) 'नेतुम्' इत्यस्मिन् पदे क्त्वा प्रत्ययः अस्ति।

(ङ) परितः योगे द्वितीया विभक्तिः भवति।

(च) 'ईश्वरः सर्वत्रः अस्ति' इत्यस्मिन् पदे ईश्वरः अव्ययम् अस्ति।

4 **उचितं विकल्पं चित्वा लिखत :** **1×6=6**

**(क) 'राज्ञः पुरुषः' इत्यस्मिन् पदे सामासिकं पदम् अस्ति –**

(i) राजस्य पुरुषः (ii) राज्ञोः पुरुषः

(iii) राजपुरुषः (iv) राजानाम पुरुषः

**(ख) 'वृक्षपतितः' इत्यत्र कः समासः अस्ति**

(i) पंचमी तत्पुरुषः (ii) षष्ठी तत्पुरुषः

(iii) तृतीया तत्पुरुषः (iv) द्वितीया तत्पुरुषः

**(ग) 'प्रतिदिनम्' इत्यस्मिन् पदे समासः अस्ति –**

(i) द्विगु समासः (ii) अव्ययीभाव समासः

(iii) तत्पुरुष समासः (iv) कर्मधारय समासः

P.T.O.

(घ) 'मनोरथः' पदे सन्धिः अस्ति –

(i) स्वर सन्धिः (ii) व्यञ्जन सन्धिः

(iii) विसर्ग सन्धिः (iv) गुण सन्धिः

(ङ) 'पित्राज्ञा' पदस्य सन्धिः विच्छेदः अस्ति –

(i) पित्रा + ज्ञा (ii) पितृ + आज्ञा

(iii) पित्र + आज्ञा (iv) पि + त्राज्ञा

(च) 'कदापि' पदस्य सन्धिः विच्छेदः अस्ति –

(i) कदा + अपि (ii) कद + आपि

(iii) कदा + पि (iv) क + दापि

5 प्रदत्तशब्दैः रिक्तस्थानपूर्ति कुरुत – 1×6=6

(क) 'पराजय' इत्यस्मिन् पदे ........... उपसर्गः अस्ति। (प्र / परा)

(ख) 'दुर्बलः' इत्यस्मिन् पदे ............ उपसर्गः अस्ति। (दुस् / दुर्)

(ग) अधिकारः पदे ............ उपसर्गः अस्ति। (अधि / अधिक)

(घ) 'लभते' इति रूपे ............ लकारः भवति। (लृट् / लट्)

(ङ) कथयन्ति पदे ............ अस्ति। (एकवचनं / बहुवचनं)

(च) 'वर्तते' पदे ............ धातुः अस्ति। (वृत् / वर्त)

6 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्व पाठ्यपुस्तकस्य एकं सुभाषितं श्लोकं लिखत। 2

7 'बुद्धचरितम्' लेखकः कः? 2

अथवा

'कुमारसम्भवम्' महाकाव्यस्य लेखकः कः?

8 कतिः नाट्यभेदाः? 2

अथवा

कादम्बरी ग्रन्थस्य लेखकः कः? अस्य ग्रंथस्य नायकः कः सन्ति?

037145990

9 अस्माकं कानि उपास्यानि ? 2

अथवा

शरीरे कः प्रहरति ?

10 कः मातुः परिवादं श्रोतुं न इच्छति ? 2

अथवा

आचार्यः किम् अनुशास्ति ?

11 महीक्षिताम् आद्यः कः आसीत् ? 2

अथवा

कः तुरीया श्रमसेवी अस्ति ?

12 सर्वस्य लोचनं किं अस्ति ? 2

अथवा

महोदधौ सेतुः केन रचितः ?

13 सुनयः तनयः कः अस्ति ? 2

अथवा

का विद्याध्ययने रता आसीत् ?

14 अधोलिखितेषु द्वयोः वाक्ययोः रेखांकितपदान्याधृत्य प्रश्ननिर्माणं कुरूत – 2

(i) पार्थिवस्य वनगमननिवृत्तिः भविष्यति।

(ii) वत्सराजः भोजं गृहाभ्यन्तरे ररक्ष।

(iii) मातुः पञ्चोपचारं पूजनं करोति।

15 अधोलिखितेषु वाक्येषु द्वयोः वाक्ययोः कः कं प्रति कथयति इति लिखत – 2

(i) एक शरीर संक्षिप्ता पृथिवी रक्षितव्या।

(ii) अहं न कस्यापि सङ्केतैः नर्तितुं पारयामि।

(iii) नर्तिष्यसि तवा एकाकिनी एव।

16 अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 3

कटुसत्यं खेल्वेतत्। परं सखि! अस्मिन् संसारे विभिन्नप्रकृतिकाः पुरुषा वसन्ति। स्वप्रकृत्यनुकूलः वरः अपि प्राप्यते। त्वं तु नवनवोन्मेषशालिन्या प्रतिभया विहितैः नूतनैः प्रयोगैः अस्मान् सर्वान् विस्मापयसि। गृहस्थाश्रमोऽपि एका प्रयोगशाला, यस्यां त्वं स्वज्ञानविज्ञानयोः प्रयोगं कर्तुं शक्ष्यसि।

प्रश्नाः –

(1) अस्मिन् संसारे कीदृशाः पुरुषाः वसन्ति?

(2) कीदृशः वरः अपि प्राप्यते?

(3) गृहस्थाश्रमः का अस्ति?

अथवा

सीता – गृहात्वार्यपुत्रः।

रामः – मैथिलि! किं व्यवसितम्?

सीता – ननु सहधर्मचारिणी खल्वहम्।

रामः – मयैकाकिना किल गन्तव्यम्।

सीता – अतो नु खल्वनुगच्छामि।

रामः – वने खलु वस्तव्यम्।

सीता – तत् खलु मे प्रासादः।

रामः – श्वश्रूश्वशुरशुश्रूषापि च ते निर्वर्तयितव्या।

सीता – एनामुद्दिश्य देवतानां प्रणामः क्रियते।

रामः – लक्ष्मण! वार्यतामियम्।

लक्ष्मणः– आर्य! नोत्सहे श्लाघनीये काले वारयितुमत्र भवतीम्।

प्रश्नाः –

(1) रामः सीतां किम् अपृच्छत्?

(2) 'वने खलु वस्तव्यम्' इति कः कथयति?

(3) लक्ष्मणः किं कथयति?

17 रिक्तस्थानपूर्तिं कुरूत (कोऽपि त्रयः) 3

(1) ............ सिन्धुलः नाम राजा आसीत्।

(2) सः ............ प्रजाः पर्यपालयत्।

(3) वैवस्वतो मनुनार्म ............ मनीषणाम्।

(4) धर्मान्त ............।

अथवा

(1) न त्वं ............ अर्हसि।

(2) सत्यं ............ धर्मम् ............।

(3) लक्ष्मणः ............ च भ्राता आसीत्।

(4) यान्यनबधानि ............ तानि सेवितव्यानि।

18 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – 3

अहं तु त्वां कस्यापि देशद्रोहिणो गूढचरं मन्ये। तदागच्छ दुर्गाध्यक्ष समीपे स एवाभिज्ञाय त्वया यथोचितं व्यवहरिष्यति ततः संन्यासी तु त्यज! नाहं पुनरायास्यामि, नाहं पुनरेव कथयिष्यामि महोश्योऽसि दयस्व इति बहुधा अकथयत् दौवारिकस्तु तमाकृष्य नयन्नैव प्रचलितः।

**प्रश्नाः –**

(1) अहं तु त्वां किम् मन्ये?

(2) कः यथोचितं व्यवहारिष्यति?

(3) त्यज! नाहं पुनरायास्यामि इति कः वदति?

अथवा

तत्र वर्णानां स्थान–करण–प्रयत्नादिभिः निष्पत्ति निर्णयिनी शिक्षा। नानाशाखाधीतानां मन्त्रणां विनियोजकं सूत्रं कल्पः। सा च यजुर्विद्या। शब्दानामन्वाख्यानं व्याकरणम्। निर्वचनं निरुक्तम् छन्दसां प्रतिपादयित्री छन्दोविचितिः। ग्रहगणितं ज्योतिषम् पौरुषेयं तु पुराणम्, आन्वीक्षिकी, मीमांसा, स्मृतितन्त्रम् इति चत्वारि शास्त्राणि। तत्र वेदाख्यानोप निबन्धन प्रायं पुराणमष्टादशधा। यदाहुः

सर्गः प्रतिसंहारः कल्पो मन्वन्तराणि वंशविधिः।
जगतो यत्र निवद्धं ताद्विज्ञेयं पुराण मिति॥

**प्रश्नाः –**

(1) वर्णानां निष्पत्ति निर्णयिंनी कः?

(2) किं व्याकरणम्?

(3) पुराणं कतिधा?

0371459003714590037145900371459003714590

**19** अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – **3**

स्वायत्तमेकान्तगुणं विधात्रा
विनिर्मितं छादनमज्ञतायाः।
विशेषतः सर्वविदां समाजे
विभूषणं मौनमपण्डितानाम्॥

प्रश्नाः –

(1) विधाता किं विनिर्मितम्?

(2) अज्ञतायाः छादनम् केन निर्मितम्?

(3) अपण्डितानां विभूषणं किम्?

**अथवा**

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्॥

प्रश्नाः –

(1) कदा अभ्यस्त विद्यानाम्?

(2) रघुवंशिनः कदा मुनिवृत्तिम् आचरन्ति?

(3) रघुवंशिनः योगेनान्ते कीदृशाम्?

**20** स्वस्य प्राचार्यस्य कृते त्रयदिवसानामवकाशार्थं प्रार्थनापत्रं संस्कृत भाषायां लिखत्। **4**

**अथवा**

छात्रवृतिर्थं स्वप्राचार्यस्य कृते एकं प्रार्थनापत्रं संस्कृत भाषायां लिखत।

**21** अधोलिखितेषु एकस्य कवेः परिचयं संस्कृत भाषायां लिखत – **4**

(1) महाकविः भासः।

(2) महर्षिः वाल्मीकिः।

(3) माघ

(4) श्रीहर्ष

(5) मम प्रिय कविः कालिदासः

0371459O

22 अधोलिखितम् अपठितगद्यांशं पठित्वा चतुर्णां प्रश्नानाम् उत्तराणि संस्कृते लिखत– 4

संसारे जनाः सुखम् इच्छति। सुखं च धनेन एव प्राप्तुं शक्यते। अतः धनोपार्जनस्य आवश्यकता भवति यस्य पार्श्वे धनं भवति सः सुखेनशेते। निर्धनं तु मित्राणि अपि त्यजन्ति। चौर्येण कपटेन च प्राप्तं धनं विनाशकरं भवति। कृषि कर्मणा व्यापारेण परिश्रमेण च प्राप्तं धनं फलति। यद् धनं फलति तेनैव सुखं प्राप्तये। धनहीनोऽपि सुखी भवति। सुखं तु मनसा अनुभूयते तत्र संतोषः तत्रैव वस्तुतः सुखम।

प्रश्नाः –

(1) कुत्र जनाः सुखम् इच्छन्ति?

(2) कथं धनोपार्जनस्य आवश्यकता भवति?

(3) सुखं कथं प्राप्तुं शक्यते?

(4) मनसा तु किम् अनुभूयते?

23 प्रदत्तैः शब्दैः अनुच्छेदलेखनं कुरूत – 4

(षट्, भवति, प्रमोदो, नृत्यन्ति, वसन्तः, उत्सवौ, नरः, पूर्णमायां)

भारते ........... ऋतवः सन्ति। तेषु ........... ऋतुराजः कथयते। चैत्रे वैसाखे च मासे वसन्तः ...........। वसन्तो द्वौ प्रमुखौ ........... भवति। वसन्तोत्सवः होलिकोत्सवः च वसन्तोत्सवे सर्वत्र ........... भवति ........... नार्याश्च सर्वत्र गायन्ति ...........च। होलिकोत्सवः फाल्गुन मासस्य ........... भवति।

अथवा

(कोऽपि, पति पत्नयौ, कुपात्रेषु, उपदेशस्य, रक्षितव्या, पति, तदापि, सहायिनी)

परस्पर प्रीतिमतोः भवतो ........... नास्ति कोऽपि अवकाशः ........... सखीस्नेहः मा भाषयति। भार्त्रा सदैव भायाभर्तव्य ........... च। यतो हि धर्मार्थकामसं सिद्धये तथा भार्या भर्तु ........... भवति तथा न ........... अन्यः। परस्परमनुव्रतौ ........... त्रिवर्ग साधयतः। ........... यदि प्रभूतं धनम् अर्जयित्वा गृहमानयति तत खलु पत्न्याभावे ........... दीयमान क्षयमेति।